# Shri Balatripurasundari Sahasranamastotram 2

# શ્રીબાલાત્રિપુરસુન્દરીસહસ્રનામસ્તોત્રમ્ ૨

## Document Information

Text title : shrI bAlAtripurasundarIsahasranAmastotram 2

File name : bAlAtripurasundarIsahasranAmastotra2.itx

Category : sahasranAma, devii, dashamahAvidyA, devI

Location : doc_devii

Transliterated by : DPD, Alex

Proofread by : DPD, PSA Easwaran

Description-comments : From Rudrayamalatantra

Latest update : August 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# શ્રીબાલાત્રિપુરસુન્દરીસહસ્રનામસ્તોત્રમ્ ૨

સમાધ્યુપરતં કાલે કદાચિદ્દ્વિજને મુદા ।
પરમાનન્દસન્દોહમુદિતં પ્રાહ પાર્વતી ॥ ૧॥

શ્રીદેવ્યુવાચ -
શ્રીમન્નાથ તવાનન્દકારણં બ્રૂહિ શઙ્કર ।
યોગીન્દ્રોપાસ્ય દેવેશ પ્રેમપૂર્ણ સુધાનિધે ।
કૃપાસ્તિ યદિ મે શમ્ભો સુગોપ્યમપિ કથ્યતામ્ ॥ ૨॥

શ્રીભૈરવઃ
નિર્ભરાનન્દસન્દોહઃ શક્તિભાવેન જાયતે ।
લાવણ્યસિન્ધુસ્તત્રાસ્તિ બાલાયા રસકન્દરઃ ॥ ૩॥

તામેવાનુક્ષણં દેવીં ચિન્તયામિ તતઃ શિવામ્ ।
તસ્યા નામસહસ્રાણિ કથયામિ તવ પ્રિયે ॥ ૪॥

સુગોપ્યાન્યપિ રમ્ભોરુ ગમ્ભીરસ્નેહવિભ્રમાત્ ।
તામેવ સ્તુવતો દેવિ ધ્યાયતોઽનુક્ષણં મમ ।
સુખસન્દોહસમ્ભાવો જ્ઞાનાનન્દસ્ય કારણમ્ ॥ ૫॥

અસ્ય શ્રીબાલાત્રિપુરસુન્દરી સહસ્રનામસ્તોત્રસ્ય શઙ્કર ઋષિઃ,
અનુષ્ટુપ્ છન્દઃ । શ્રીબાલાત્રિપુરા દેવતા । ઐં બીજમ્ । સૌઃ શક્તિઃ ।
ક્લીં કીલકમ્ । શ્રીબાલાપ્રીત્યર્થે સમસ્તપુરુષાર્થસિદ્ધ્યર્થે
પારાયણે વિનિયોગઃ ।
ઐં અઙ્ગુષ્ઠાભ્યાં નમઃ । ક્લીં તર્જનીભ્યાં નમઃ ।
સૌઃ મધ્યમાભ્યાં નમઃ । ઐં અનામિકાભ્યાં નમઃ ।
ક્લીં કનિષ્ઠિકાભ્યાં નમઃ । સૌઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
એવં હૃદયાદિન્યાસઃ ।
ધ્યાનમ્ ।
અરુણકિરણજાલૈ રઞ્જિતાશાવકાશા

વિધૃતજપવટીકા પુસ્તકાભીતિહસ્તા ।
ઇતરવરકરાઢ્યા ફુલ્લકલ્હાર સંસ્થા
નિવસતુ હૃદિ બાલા નિત્યકલ્યાણશીલા ॥

રક્તામ્બરાં ચન્દ્રકલાવતંસાં સમુદ્યદાદિત્યનિભાં ત્રિનેત્રામ્ ।
વિદ્યાક્ષમાલાભયદાનહસ્તાં ધ્યાયામિ બાલામરુણામ્બુજસ્થામ્ ॥

આનન્દસિન્ધુરાનન્દાઽઽનન્દમૂર્તિર્વિનોદિની ।
ત્રિપુરા સુન્દરી પ્રેમપાથોનિધિરનુત્તમા ॥ ૧॥

વામાર્ધગહ્વરા ભૂતિર્વિભૂતિઃ શઙ્કરી શિવા ।
શૃઙ્ગારમૂર્તિર્વરદા રસા ચ શુભગોચરા ॥ ૨॥

પરમાનન્દલહરી રતી રઙ્ગવતી ગતિઃ ।
રઙ્ગમાલાનઙ્ગકલા કેલી કૈવલ્યદા કલા ॥ ૩॥

રસકલ્પા કલ્પલતા કુતૂહલવતી ગતિઃ ।
વિનોદદિગ્ધા સુસ્નિગ્ધા મુગ્ધમૂર્તિર્મનોરમા ॥ ૪॥

બાલાર્કકોટિકિરણા ચન્દ્રકોટિસુશીતલા ।
સ્રવત્પીયૂષદિગ્ધાઙ્ગી સ્વર્ગાર્થપરિકલ્પિતા ॥ ૫॥

કુરઙ્ગનયના કાન્તા સુગતિઃ સુખસન્તતિઃ ।
રાજરાજેશ્વરી રાજ્ઞી મહેન્દ્રપરિવન્દિતા ॥ ૬॥

પ્રપઞ્ચગતિરીશાની પ્રપઞ્ચગતિરુત્તમા ।
દુર્વાસા દુઃસહા શક્તિઃ શિઞ્જત્કનકનૂપુરા ॥ ૭॥

મેરુમન્દરવક્ષોજા સૃણિપાશવરાયુધા ।
શરકોદણ્ડસંસક્તપાણિદ્વયવિરાજિતા ॥ ૮॥

ચન્દ્રબિમ્બાનના ચારુમુકુટોત્તંસચન્દ્રિકા ।
સિન્દૂરતિલકા ચારુધમ્મિલ્લામલમાલિકા ॥ ૯॥

મન્દારદામમુદિતા રત્નમાલાવિભૂષિતા ।
સુવર્ણાભરણપ્રીતા મુક્તાદામમનોરમા ॥ ૧૦॥

તામ્બૂલપૂર્ણવદના મદનાનન્દમાનસા ।
સુખારાધ્યા તપઃ સારા કૃપાપારા વિધીશ્વરી ॥ ૧૧॥

વક્ષઃસ્થલલસદ્રત્નપ્રભા મધુરસોન્મદા ।

બિન્દુનાદાત્મકોચ્ચારરહિતા તુર્યરૂપિણી ॥ ૧૨॥

કમનીયાકૃતિર્ધન્યા શાઙ્કરી પ્રીતિમઞ્જરી ।
પ્રપઞ્ચા પઞ્ચમી પૂર્ણા પૂર્ણપીઠનિવાસિની ॥ ૧૩॥

રાજ્યલક્ષ્મીશ્ચ શ્રીલક્ષ્મીર્મહાલક્ષ્મીઃ સુરાજિકા ।
સન્તોષસીમા સમ્પત્તિઃ શાતકૌમ્ભી ૧ તથા દ્યુતિઃ ॥ ૧૪॥

૧ શાતકુમ્ભપ્રિયાકૃતિઃ
પરિપૂર્ણા જગદ્ધાત્રી વિધાત્રી બલવર્ધિની ।
સાર્વભૌમનૃપશ્રીશ્ચ સામ્રાજ્યગતિરમ્બિકા ॥ ૧૫॥

સરોજાક્ષી દીર્ઘદૃષ્ટિઃ સાચીક્ષણવિચક્ષણા ।
રઙ્ગસ્રવન્તી રસિકા (૧૦૦) પ્રધાના રસરૂપિણી ॥ ૧૬॥

રસસિન્ધુઃ સુગાત્રી ચ ધૂસરી મૈથુનોન્મુખા ।
નિરન્તરગુણાસક્તા શક્તિર્નિધુવનાત્મિકા ॥ ૧૭॥

કામાક્ષી કમનીયા ચ કામેશી ભગમઙ્ગલા ।
સુભગા ભોગિની ભોગ્યા ભગ્યદા સુભગા ભગા ॥ ૧૮॥

ભગલિઙ્ગાનન્દકલા ભગમધ્યનિવાસિની ।
ભગરૂપા ભગમયી ભગયન્ત્રા ભગોત્તમા ॥ ૧૯॥

યોનિમુદ્રા કામકલા કુલામૃતપરાયણા ।
કુલકુણ્ડાલયા સૂક્ષ્મા જીવાત્મા લિઙ્ગરૂપિણી ॥ ૨૦॥

મૂલક્રિયા મૂલરૂપા મૂલાકૃતિસ્વરૂપિણી ।
સોત્સુકા કમલાનન્દા ચિદ્ભાવાઽઽત્મગતિઃ શિવા ॥ ૨૧॥

શ્વેતારુણા બિન્દુરૂપા વેદયોનિર્ધ્વનિક્ષણા ।
ઘણ્ટાકોટિ રવારાવા રવિબિમ્બોત્થિતાઽદ્ભુતા ॥ ૨૨॥

નાદાન્તલીના સમ્પૂર્ણા પૂર્ણસ્થા બહુરૂપિકા ।
ભૃઙ્ગારાવા વંશગતિર્વાદિત્રા મુરજધ્વનિઃ ॥ ૨૩॥

વર્ણમાલા સિદ્ધિકલા ષટ્ ચક્રક્રમવાસિની ।
મૂલકેલીરતા સ્વાધિષ્ઠાના તુર્યનિવાસિની ॥ ૨૪॥

મણિપૂરસ્થિતિઃ સ્નિગ્ધા કૂર્મચક્રપરાયણા ।
અનાહતગતિર્દીપશિખા મણિમયાકૃતિઃ ॥ ૨૫॥

વિશુદ્ધા શબ્દસંશુદ્ધા જીવબોધસ્થલી રવા ।
આજ્ઞાચક્રાબ્જસંસ્થા ચ સ્ફુરન્તી નિપુણા ત્રિવૃત્ ॥ ૨૬॥

ચન્દ્રિકા ચન્દ્રકોટિ શ્રીઃ સૂર્યકોટિપ્રભામયી ।
પદ્મરાગારુણચ્છાયા નિશ્ચલાઽમૃતનન્દિની ।
કાન્તાઙ્ગસઙ્ગમુદિતા સુધામાધુર્યસમ્ભૃતા ॥ ૨૮॥

મહામઞ્ચસ્થિતાઽલિપ્તા તૃપ્તા દૃપ્તા સુસમ્ભૃતિઃ ।
સ્રવત્પીયૂષસંસિક્તા રક્તાર્ણવવિવર્ધિની ॥ ૨૯॥

સુરક્તા પ્રિયસંસિક્તા શશ્વત્કુણ્ડાલયાઽભયા । (૨૦૦) ।
શ્રેયઃ શ્રુતિશ્ચ પ્રત્યેકાનવકેશિફલાવલી ॥ ૩૦॥

પ્રીતા શિવા શિવપ્રિયા શાઙ્કરી શામ્ભવી વિભા ।
સ્વયમ્ભૂઃ સ્વપ્રિયા સ્વીયા સ્વકીયા જનમાતૃકા ॥ ૩૧॥

સ્વારામા સ્વાશ્રયા સાધ્વી સુધાધારાઽધિકાધિકા ।
મઙ્ગલોજ્જયિની માન્યા સર્વમઙ્ગલસઙ્ગિની ॥ ૩૨॥

ભદ્રા ભદ્રાવલી કન્યા કલિતાર્ધેન્દુબિમ્બભાક્ ।
કલ્યાણલતિકા કામ્યા કુકર્મા કુમતિર્મનુઃ ॥ ૩૩॥

કુરઙ્ગાક્ષી ક્ષીબનેત્રા ક્ષારા રસમદોન્મદા ।
વારુણીપાનમુદિતા મદિરારચિતાશ્રયા ॥ ૩૪॥

કાદમ્બરીપાનરુચિર્વિપાશા પાશભીતિનુત્ ।
મુદિતા મુદિતાપાઙ્ગા દરદોલિતદીર્ઘદૃક્ ॥ ૩૫॥

દૈત્યકુલાનલશિખા મનોરથસુધાદ્યુતિઃ ।
સુવાસિની પીનગાત્રી પીનશ્રોણિપયોધરા ॥ ૩૬॥

સુચારુકબરી દન્તદીધિતિદીપ્રમૌક્તિકા ।
બિમ્બાધરા દ્યુતિમુખા પ્રવાલોત્તમદીધિતિઃ ॥ ૩૭॥

તિલપ્રસૂનનાસાગ્રા હેમકક્કોલભાલકા ।
નિષ્કલઙ્કેન્દુવદના બાલેન્દુમુકુટોજ્જ્વલા ॥ ૩૮॥

નૃત્યત્ખઞ્જનનેત્રશ્રીર્વિસ્ફુરત્કર્ણશષ્કુલી ।
બાલચન્દ્રાતપત્રાર્ધા મણિસૂર્યકિરીટિની ૧ ॥ ૩૯॥

૧ કેશૌઘચમ્પકાસેનામાલતીદામપણ્ડિતા - ઇત્યધિકમ્ ।
હેમમાણિક્યતાટઙ્કા મણિકાઞ્ચનકુણ્ડલા ।
સુચારુચિબુકા કમ્બુકણ્ઠી મણિમનોરમા ॥ ૪૦॥

ગઙ્ગાતરઙ્ગહારોર્મિર્મત્તકોકિલનિઃસ્વના ।
મૃણાલવિલસદ્બાહુઃ પાશાઙ્કુશધનુર્ધરા ॥ ૪૧॥

કેયૂરકટકાચ્છન્ના નાનારત્નમનોરમા ।
તામ્રપઙ્કજપાણિશ્રીર્નખરત્નપ્રભાવતી ॥ ૪૨॥

અઙ્ગુલીયમણિશ્રેણિચઞ્ચદઙ્ગુલિસન્તતિઃ ।
મન્દરદ્વન્દ્વસુકુચા રોમરાજીભુજઙ્ગકા ॥ ૪૩॥

ગમ્ભીરનાભિસ્ત્રિવલીવલયા ચ સુમધ્યમા ।
રણત્કાઞ્ચીગુણોન્નદ્ધા પટ્ટાંશુકસુનીવિકા ॥ ૪૪॥

મેરુગુણ્ડીનિતમ્બાઢ્યા ગજગણ્ડોરુયુગ્મયુક્ ।
સુજાનુમન્દરાસક્તલસજ્જઙ્ઘાદ્વયાન્વિતા ॥ ૪૫॥

ગૂઢગુલ્ફા મઞ્જુશિઞ્જન્મણિનૂપુરમણ્ડિતા ૧ ।
૧ પદદ્વન્દ્વા રુણામ્ભોજા નખચન્દ્રા રવિપ્રભા ।
સુસોમપ્રપદા રાજહંસા મત્તેભમન્દગા ॥ ઇત્યધિકમ્ (extra) ।
યોગિધ્યેયપદદ્વન્દ્વા સુધામાઽમૃતસારિણી ॥ ૪૬॥

લાવણ્યસિન્ધુઃ સિન્દૂરતિલકા કુટિલાલકા ।
સાધુસિદ્ધા સુબુદ્ધા ચ બુધા વૃન્દારકોદયા ॥ ૪૭॥

બાલાર્કકિરણશ્રેણીશોણા શ્રીપ્રેમકામધુક્ ।
રસગમ્ભીરસરસી પદ્મિની (૩૦૦) રસસારસા ॥ ૪૮॥

પ્રસન્નાઽઽસન્નવરદા શારદા ચ સુભાગ્યદા ।
નટરાજપ્રિયા વિશ્વનાટ્યા નર્તકનર્તકી ॥ ૪૯॥

વિચિત્રયન્ત્રા ચિત્તન્ત્રા વિદ્યાવલ્લી ગતિઃ શુભા ।
કૂટારકૂટા કૂટસ્થા પઞ્ચકૂટા ચ પઞ્ચમી ॥ ૫૦॥

ચતુષ્કૂટા ત્રિકૂટાદ્યા ષટ્કૂટા વેદપૂજિતા ।
કૂટષોડશસમ્પન્ના તુરીયા પરમા કલા ॥ ૫૧॥

ષોડશી મન્ત્રયન્ત્રાણામીશ્વરી મેરુમણ્ડલા ।

ષોડશાર્ણા ત્રિવર્ણા ચ બિન્દુનાદસ્વરૂપિણી ॥ ૫૨॥

વર્ણાતીતા વર્ણમાતા શબ્દબ્રહ્મમહાસુખા ।
ચૈતન્યવલ્લી કૂટાત્મા કામેશી સ્વપ્રદૃશ્યગા ॥ ૫૩॥

સ્વપ્નાવતી બોધકરી જાગૃતિર્જાગરાશ્રયા ।
સ્વપ્નાશ્રયા સુષુપ્તિશ્ચ તન્દ્રામુક્તા ચ માધવી ॥ ૫૪॥

લોપામુદ્રા કામરાજ્ઞી માનવી વિત્તપાર્ચિતા ।
શાકમ્ભરી નન્દિવિદ્યા ભાસ્વદ્વિદ્યોતમાલિની ॥ ૫૫॥

માહેન્દ્રી સ્વર્ગસમ્પત્તિર્દુર્વાસઃસેવિતા શ્રુતિઃ ।
સાધકેન્દ્રગતિઃ સાધ્વી સુલભા સિદ્ધિકન્દરા ॥ ૫૬॥

પુરત્રયેશી પુરજિદર્ચિતા પુરદેવતા ।
પુષ્ટિર્વિઘ્નહરી ભૂતિર્વિગુણા પૂજ્યકામધુક્ ॥ ૫૭॥

હિરણ્યમાતા ગણપા ગુહમાતા નિતમ્બિની ।
સર્વસીમન્તિની મોક્ષા દીક્ષા દીક્ષિતમાતૃકા ॥ ૫૮॥

સાધકામ્બા સિદ્ધમાતા સાધકેન્દ્રા મનોરમા ।
યૌવનોન્માદિની તુઙ્ગા સુશ્રોણિર્મદમન્થરા ॥ ૫૯॥

પદ્મરક્તોત્પલવતી રક્તમાલ્યાનુલેપના ।
રક્તમાલારુચિઃ શિખાશિખણ્ડિન્યતિસુન્દરી ॥ ૬૦॥

શિખણ્ડિનૃત્તસન્તુષ્ટા સૌરભેયી વસુન્ધરા ।
સુરભિઃ કામદા કામ્યા કમનીયાર્થકામદા ॥ ૬૧॥

નન્દિની લક્ષણવતી વસિષ્ઠાલયદેવતા ।
ગોલોકદેવી (૪૦૦) લોકશ્રીર્ગોલોકપરિપાલિકા ॥ ૬૨॥

હવિર્ધાની દેવમાતા વૃન્દારકવરાનુયુક્ ।
રુદ્રપત્ની ભદ્રમાતા સુધાધારાઽમ્બુવિક્ષતિઃ ॥ ૬૩॥

દક્ષિણા યજ્ઞસમ્મૂર્તિઃ સુબાલા ધીરનન્દિની ।
ક્ષીરપૂર્ણાર્ણવગતિઃ સુધાયોનિઃ સુલોચના ॥ ૬૪॥

રામાનુગા સુસેવ્યા ચ સુગન્ધાલયવાસગા ।
સુચારિત્રા સુત્રિપુરા સુસ્તની સ્તનવત્સલા ॥ ૬૫॥

રજસ્વલા રજોયુક્તા રઞ્જિકા રઙ્ગમાલિકા ।
રક્તપ્રિયા સુરક્તા ચ રતિરઙ્ગસ્વરૂપિણી ॥ ૬૬॥

રજઃ શુક્રામ્બિકા નિષ્ઠા રતનિષ્ઠા રતિસ્પૃહા ।
હાવભાવા કામકેલિસર્વસ્વા સુરજીવિકા ॥ ૬૭॥

સ્વયમ્ભૂકુસુમાનન્દા સ્વયમ્ભૂકુસુમપ્રિયા ।
સ્વયમ્ભૂપ્રીતિસન્તુષ્ટા સ્વયમ્ભૂનિન્દકાન્તકૃત્ ॥ ૬૮॥

સ્વયમ્ભૂસ્થા શક્તિપુટી રતિસર્વસ્વપીઠિકા ।
અત્યન્તસભિકા દૂતી વિદગ્ધા પ્રીતિપૂજિતા ॥ ૬૯॥

કુલ્લિકા યન્ત્રનિલયા યોગપીઠાધિવાસિની ।
સુલક્ષણા રસરૂપા સર્વલક્ષણલક્ષિતા ॥ ૭૦॥

નાનાલઙ્કારસુભગા પઞ્ચબાણસમર્ચિતા ।
ઊર્ધ્વત્રિકોણનિલયા બાલા કામેશ્વરી તથા ॥ ૭૧॥

ગણાધ્યક્ષા કુલાધ્યક્ષા લક્ષ્મીશ્ચૈવ સરસ્વતી ।
વસન્તસમયપ્રીતા પ્રીતિઃ કુચભરાનતા ॥ ૭૨॥

કલાધરમુખાઽમૂર્ધા પાદવૃદ્ધિઃ કલાવતી ।
પુષ્પપ્રિયા ધૃતિશ્ચૈવ રતિકણ્ઠી મનોરમા ॥ ૭૩॥

મદનોન્માદિની ચૈવ મોહિની પાર્વણીકલા ।
શોષિણી વશિની રાજિન્યત્યન્તસુભગા ભગા ॥ ૭૪॥

પૂષા વશા ચ સુમના રતિઃ પ્રીતિર્ધૃતિસ્તથા ।
ઋદ્ધિઃ સૌમ્યા મરીચ્યંશુમાલા પ્રત્યઙ્ગિરા તથા ॥ ૭૫॥

શશિની ચૈવ સુચ્છાયા સમ્પૂર્ણમણ્ડલોદયા ।
તુષ્ટા ચામૃતપૂર્ણા ચ ભગયન્ત્રનિવાસિની ॥ ૭૬॥

લિઙ્ગયન્ત્રાલયા (૫૦૦) શમ્ભુરૂપા સંયોગયોગિની ।
દ્રાવિણી બીજરૂપા ચ અક્ષુબ્ધા સાધકપ્રિયા ॥ ૭૭॥

રાજબીજમયી રાજ્યસુખદા વાઞ્છિતપ્રદા ।
રજઃ સંવીર્યશક્તિશ્ચ શુક્રવિચ્છિવરૂપિણી ॥ ૭૮॥

સર્વસારા સારમયા શિવશક્તિમયી પ્રભા ।
સંયોગાનન્દનિલયા સંયોગપ્રીતિમાતૃકા ॥ ૭૯॥

સંયોગકુસુમાનન્દા સંયોગા યોગવર્ધિની ।
સંયોગસુખદારસ્થા ચિદાનન્દૈકસેવિતા ॥ ૮૦॥

અર્ઘ્યપૂજકસમ્પત્તિરર્ઘ્યદ્રવ્યસ્વરૂપિણી ।
સામરસ્યા પરા પ્રીતા પ્રિયસઙ્ગમરૂપિણી ॥ ૮૧॥

જ્ઞાનદૂતી જ્ઞાનગમ્યા જ્ઞાનયોનિઃ શિવાલયા ।
ચિત્કલા જ્ઞાનસકલા સકુલા સકુલાત્મિકા ॥ ૮૨॥

કલાચતુષ્ટયી પદ્મિન્યતિસૂક્ષ્મા પરાત્મિકા ।
હંસકેલિસ્થલી ચ્છાયા હંસદ્વયવિકાસિની ॥ ૮૩॥

વિરાગતા મોક્ષકલા પરમાત્મકલાવતી ।
વિદ્યાકલાન્તરાત્મસ્થા ચતુષ્ટયકલાવતી ॥ ૮૪॥

વિદ્યાસન્તોષિણી તૃપ્તિઃ પરબ્રહ્મપ્રકાશિકા ।
પરમાત્મપરા વસ્તુલીનશક્તિચતુષ્ટયી ॥ ૮૫॥

શાન્તિર્બોધકલાવાપ્તિઃ પરજ્ઞાનાત્મિકા કલા ।
પશ્યન્તી પરમાત્મસ્થા ચાન્તરાત્મકલાકુલા ॥ ૮૬॥

મધ્યમા વૈખરી ચાત્મકલાનન્દા કલાવતી ।
તારિણી તરણી તારા શિવલિઙ્ગાલયાઽઽત્મવિત્ ॥ ૮૭॥

પરસ્પરશુભાચારા બ્રહ્માનન્દવિનોદિની ।
રસાલસા દૂતરાસા સાર્થા સાર્થપ્રિયા હ્યુમા ॥ ૮૮॥

જાત્યાદિરહિતા યોગિયોગિન્યાનન્દવર્ધિની । ૧
૧ કાન્તા શાન્તા દાન્તગતિર્વેદાદ્યુદ્દામપદ્ધતિઃ - ઇત્યધિકમ્ ।
વીરભાવપ્રદા દિવ્યા વીરસૂર્વીરભાવદા ॥ ૮૯॥

પશુત્વાભિવીરગતિર્વીરસઙ્ગમહોદયા ।
મૂર્ધાભિષિક્ત રાજશ્રીઃ ક્ષત્રિયોત્તમમાતૃકા ॥ ૯૦॥

શસ્ત્રાસ્ત્રકુશલા શોભા રસસ્થા યુદ્ધજીવિકા ।
વિજયા યોગિની યાત્રા પરસૈન્યવિમર્દિની ॥ ૯૧॥

પૂર્ણા (૬૦૦) વિત્તૈષિણી વિત્તા વિત્તસઞ્ચયશાલિની ।
ભાણ્ડાગારસ્થિતા રત્ના રત્નશ્રેણ્યધિવાસિની ॥ ૯૨॥

મહિષી રાજભોગ્યા ચ ગણિકા ગણભોગભૃત્ ।
કરિણી વડવા યોગ્યા મલ્લસેના પદાતિકા ॥ ૯૩॥

સૈન્યશ્રેણી શૌર્યરતા પતાકાધ્વજવાસિની ।
સુચ્છત્રા ચામ્બિકા ચામ્બા પ્રજાપાલનસદ્ગતિઃ ॥ ૯૪॥

સુરભિઃ પૂજકાચારા રાજકાર્યપરાયણા ।
બ્રહ્મક્ષત્રમયી સોમસૂર્યાન્તર્યામિની સ્થિતિઃ ॥ ૯૫॥

પૌરોહિત્યપ્રિયા સાધ્વી બ્રહ્માણી યજ્ઞસન્તતિઃ ।
સોમપાનપરા પ્રીતા જનાઢ્યા તપના ક્ષમા ॥ ૯૬॥

પ્રતિગ્રહપરા દાત્રી સૃષ્ટાજાતિઃ સતાઙ્ગતિઃ ।
ગાયત્રી વેદલભ્યા ચ દીક્ષા સન્ધ્યાપરાયણા ॥ ૯૭॥

રત્નસદ્દીધિતિર્વિશ્વવાસના વિશ્વજીવિકા ।
કૃષિવાણિજ્યભૂતિશ્ચ વૃદ્ધિર્ધીશ્ચ કુસીદિકા ॥ ૯૮॥

કુલાધારા સુપ્રસારા મનોન્મની પરાયણા ।
શૂદ્રા વિપ્રગતિઃ કર્મકરી કૌતુકપૂજિતા ॥ ૯૯॥

નાનાવિચારચતુરા બાલા પ્રૌઢા કલામયી ।
સુકર્ણધારા નૌઃ પારા સર્વાશા દુર્ગમોચની ॥ ૧૦૦॥

દુર્ગા વિન્ધ્યવનસ્થા ચ કન્દર્પનયપૂરણી ।
ભૂભારશમની કૃષ્ણા રક્ષારાધ્યા રસોલ્લસા ॥ ૧૦૧॥

ત્રિવિધોત્પાતશમની સમગ્રસુખશેવધિઃ ।
પઞ્ચાવયવવાક્યશ્રીઃ પ્રપઞ્ચોદ્યાનચન્દ્રિકા ॥ ૧૦૨॥

સિદ્ધસન્દોહસુખિતા યોગિનીવૃન્દવન્દિતા ।
નિત્યાષોડશરૂપા ચ કામેશી ભગમાલિની ॥ ૧૦૩॥

નિત્યક્લિન્ના ચ ભી(ભે) રુણ્ડા વહ્નિમણ્ડલવાસિની ।
મહાવિદ્યેશ્વરી નિત્યા શિવદૂતીતિ વિશ્રુતા ॥ ૧૦૪॥

ત્વરિતા પ્રથિતા ખ્યાતા વિખ્યાતા કુલસુન્દરી ।
નિત્યા નીલપતાકા ચ વિજયા સર્વમઙ્ગલા ॥ ૧૦૫॥

જ્વાલામાલા(૭૦૦) વિચિત્રા ચ મહાત્રિપુરસિન્દરી ।
ગુરુવૃન્દા પરગુરુઃ પ્રકાશાનન્દનાથિની ॥ ૧૦૬॥

શિવાનન્દનાથરૂપા શક્ત્યાનન્દસ્વરૂપિણી ।
દેવ્યાનન્દનાથમયી કૌલેશાનન્દનાથિની ॥ ૧૦૭॥

દિવ્યૌઘગુરુરૂપા ચ સમયાનન્દનાથિની ।
શુક્લદેવ્યાનન્દનાથા કુલેશાનન્દનાથિની ૧ ॥ ૧૦૮॥

૧ કામેશ્વર્યાનન્દનાથમયી શ્રીગુરુરૂપિણી - ઇત્યધિકમ્ ।
ક્લિન્નાઙ્ગાનન્દરૂપા ચ સમયાનન્દનાથિની ।
વેદાનન્દનાથમયી સહજાનન્દનાથિની ॥ ૧૦૯॥

સિદ્ધૌઘગુરુરૂપા ચ અપરાગુરુરૂપિણી ।
ગગનાનન્દનાથા ચ વિશ્વાનન્દસ્વનાથિની ॥ ૧૧૦॥

વિમલાનન્દનાથા ચ મદનાનન્દનાથિની ।
ભુવનાદ્યા ચ લીલાદ્યા નન્દનાનન્દનાથિની ॥ ૧૧૧॥

સ્વાત્માનન્દાનન્દરૂપા પ્રિયાદ્યાનન્દનાથિની ।
માનવૌઘગુરુશ્રેષ્ઠા પરમેષ્ઠિ ગુરુપ્રભા ॥ ૧૧૨॥

પરગુહ્યા ગુરુશક્તિઃ સ્વગુરુકીર્તનપ્રિયા ।
ત્રૈલોક્યમોહનખ્યાતા સર્વાશાપરિપૂરકા ॥ ૧૧૩॥

સર્વસઙ્ક્ષોભિણી પૂર્વામ્નાયપ્રથિતવૈભવા ।
શિવાશક્તિઃ શિવશક્તિઃ શિવચક્રત્રયાલયા ॥ ૧૧૪॥

સર્વસૌભાગ્યદાખ્યા ચ સર્વાર્થસાધિકાહ્વયા ।
સર્વરક્ષાકરાખ્યા ચ દક્ષિણામ્નાયદેવતા ॥ ૧૧૫॥

મધ્યાર્કચક્રનિલયા પશ્ચિમામ્નાયદેવતા ।
નવચક્રકૃતાવાસા કૌબેરામ્નાયદેવતા ॥ ૧૧૬॥

કુબેરપૂજ્યા કુલજા કુલામ્નાયપ્રવર્તિની ।
બિન્દુચક્રકૃતાવાસા મધ્યસિંહાસનેશ્વરી ॥ ૧૧૭॥

શ્રીવિદ્યા ચ મહાલક્ષ્મીઃ લક્ષ્મીઃ શક્તિત્રયાત્મિકા ।
સર્વસામ્રાજ્યલક્ષ્મીશ્ચ પઞ્ચલક્ષ્મીતિવિશ્રુતા ॥ ૧૧૮॥

શ્રીવિદ્યા ચ પરઞ્જ્યોતિઃ પરનિષ્કલશામ્ભવી ।
માતૃકા પઞ્ચકોશી ચ શ્રીવિદ્યા ત્વરિતા તથા ॥ ૧૧૯॥

પારિજાતેશ્વરી ચૈવ ત્રિકૂટા પઞ્ચબાણગા ।
પઞ્ચકલ્પલતા પઞ્ચવિદ્યા ચામૃતપીઠિકા ॥ ૧૨૦॥

સુધાસૂ રમણેશાના ચાન્નપૂર્ણા ચ કામધુક્ ।
શ્રીવિદ્યા સિદ્ધલક્ષ્મીશ્ચ માતઙ્ગી ભુવનેશ્વરી ॥ ૧૨૧॥

વારાહી પઞ્ચરત્નાનામીશ્વરી માતૃવર્ણગા ।
પરાઞ્જ્યોતિઃ કોશરૂપા ઐન્દવી કલયા યુતા ॥ ૧૨૨॥

પરિતઃ સ્વામિની શક્તિદર્શના રવિબિન્દુયુક્ ।
બ્રહ્મદર્શનરૂપા ચ શિવદર્શનરૂપિણી ॥ ૧૨૩॥

વિષ્ણુદર્શનરૂપા ચ સૃષ્ટિચક્રનિવાસિની ।
સૌરદર્શનરૂપા ચ સ્થિતિચક્રકૃતાલયા ॥ ૧૨૪॥

બૌદ્ધદર્શનરૂપા ચ મહાત્રિપુરસુન્દરી ।
તત્ત્વમુદ્રાસ્વરૂપા ચ પ્રસન્ના(૮૦૦) જ્ઞાનમુદ્રિકા ॥ ૧૨૫॥

સર્વોપચારસન્તુષ્ટા હૃન્મયી શીર્ષદેવતા ।
શિખાસ્થિતા બ્રહ્મમયી નેત્રત્રયવિલાસિની ॥ ૧૨૬॥

અસ્ત્રસ્થા ચતુરસ્રા ચ દ્વારકાદ્વારવાસિની ।
અણિમા પશ્ચિમસ્થા ચ લઘિમોત્તરદેવતા ॥ ૧૨૭॥

પૂર્વસ્થા મહિમેશિત્વા દક્ષિણદ્વારદેવતા ।
વશિત્વા વાયુકોણસ્થા પ્રાકામ્યેશાનદેવતા ॥ ૧૨૮॥

અગ્નિકોણસ્થિતા ભુક્તિરિચ્છા નૈરૃતવાસિની ।
પ્રાપ્તિસિદ્ધિરવસ્થા ચ પ્રાકામ્યાર્ધવિલાસિની ॥ ૧૨૯॥

બ્રાહ્મી માહેશ્વરી ચૈવ કૌમારી વૈષ્ણવી તથા ।
વારાહ્યૌન્દ્રી ચ ચામુણ્ડા મહાલક્ષ્મીર્દિશાઙ્ગતિઃ ॥ ૧૩૦॥

ક્ષોભિણી દ્રાવિણી મુદ્રાઽઽકર્ષોન્માદનકારિણી ।
મહાઙ્કુશા ખેચરી ચ બીજાખ્યા યોનિમુદ્રિકા ॥ ૧૩૧॥

સર્વાશાપૂરચક્રસ્થા કાર્યસિદ્ધિકરી તથા ।
કામાકર્ષિણિકાશક્તિર્બુદ્ધ્યાકર્ષણરૂપિણી ॥ ૧૩૨॥

અહઙ્કારાકર્ષિણી ચ શબ્દાકર્ષણરૂપિણી ।
સ્પર્શાકર્ષણરૂપા ચ રૂપાકર્ષણરૂપિણી ॥ ૧૩૩॥

રસાકર્ષણરૂપા ચ ગન્ધાકર્ષણરૂપિણી ।
ચિત્તાકર્ષણરૂપા ચ ધૈર્યાકર્ષણરૂપિણી ॥ ૧૩૪॥

સ્મૃત્યાકર્ષણરૂપા ચ બીજાકર્ષણરૂપિણી ।
અમૃતાકર્ષિણી ચૈવ નામાકર્ષણરૂપિણી ॥ ૧૩૫॥

શરીરાકર્ષિણીદેવી આત્માકર્ષણરૂપિણી ।
ષોડશસ્વરરૂપા ચ સ્રવત્પીયૂષમન્દિરા ॥ ૧૩૬॥

ત્રિપુરેશી સિદ્ધરૂપા કલાદલનિવાસિની ।
સર્વસઙ્ક્ષોભચક્રેશી શક્તિર્ગુપ્તતરાભિધા ॥ ૧૩૭॥

અનઙ્ગકુસુમાશક્તિરનઙ્ગકટિમેખલા ।
અનઙ્ગમદનાઽનઙ્ગમદનાતુરરૂપિણી ॥ ૧૩૮॥

અનઙ્ગરેખા ચાનઙ્ગવેગાનઙ્ગાઙ્કુશાભિધા ।
અનઙ્ગમાલિની શક્તિરષ્ટવર્ગદિગન્વિતા ॥ ૧૩૯॥

વસુપત્રકૃતાવાસા શ્રીમત્ત્રિપુરસુન્દરી ।
સર્વસામ્રાજ્યસુખદા સર્વસૌભાગ્યદેશ્વરી ॥ ૧૪૦॥

સમ્પ્રદાયેશ્વરી સર્વસઙ્ક્ષોભણકરી તથા ।
સર્વવિદ્રાવિણી સર્વાકર્ષણાટોપકારિણી ॥ ૧૪૧॥

સર્વાહ્લાદનશક્તિશ્ચ સર્વજૃમ્ભણકારિણી ।
સર્વસ્તમ્ભન શક્તિશ્ચ સર્વસમ્મોહિની તથા ॥ ૧૪૨॥

સર્વવશ્યકરીશક્તિઃ સર્વસર્વાનુરઞ્જિની ।
સર્વોન્માદનશક્તિશ્ચ સર્વાર્થસિદ્ધિકારિણી ॥ ૧૪૩॥

સર્વસમ્પત્તિદા શક્તિઃ સર્વમન્ત્રમયી તથા ।
સર્વદ્વન્દ્વક્ષયકરી(૯૦૦) સિદ્ધિસ્ત્રિપુરવાસિની ॥ ૧૪૪॥

સર્વાર્થસાધકેશી ચ સર્વકાર્યાર્થસિદ્ધિદા ।
ચતુર્દશારચક્રેશી કલાયોગસમન્વિતા ॥ ૧૪૫॥

સર્વસિદ્ધિપ્રદા દેવી સર્વસમ્પત્પ્રદા તથા ।
સર્વપ્રિયઙ્કરી શક્તિઃ સર્વમઙ્ગલકારિણી ॥ ૧૪૬॥

સર્વકામપ્રપૂર્ણા ચ સર્વદુઃખપ્રમોચિની ।

સર્વમૃત્યુપ્રશમની સર્વવિઘ્નવિનાશિની ॥ ૧૪૭॥

સર્વાઙ્ગસુન્દરી દેવી સર્વસૌભાગ્યદાયિની ।
ત્રિપુરેશી સર્વસિદ્ધિપ્રદા ચ દશકોણગા ॥ ૧૪૮॥

સર્વરક્ષાકરેશી ચ નિગર્ભા યોગિની તથા ।
સર્વજ્ઞા સર્વશક્તિશ્ચ સર્વૈશ્વર્યપ્રદા તથા ॥ ૧૪૯॥

સર્વજ્ઞાનમયીદેવી સર્વવ્યાધિવિનાશિની ।
સર્વાધારસ્વરૂપા ચ સર્વપાપહરા તથા ॥ ૧૫૦॥

સર્વાનન્દમયીદેવી સર્વરક્ષાસ્વરૂપિણી ।
મહિમાશક્તિદેવી ચ દેવી સર્વસમૃદ્ધિદા ॥ ૧૫૧॥

અન્તર્દશારચક્રેશી દેવી ત્રિપુરમાલિની ।
સર્વરોગહરેશી ચ રહસ્યા યોગિની તથા ॥ ૧૫૨॥

વાગ્દેવી વશિની ચૈવ દેવીકામેશ્વરી તથા ।
મોદિની વિમલા ચૈવ અરુણા જયિની તથા ॥ ૧૫૩॥

સર્વેશ્વરી કૌલિની ચ હ્યષ્ટારસર્વસિદ્ધિદા ।
સર્વકામપ્રદેશી ચ પરાપરરહસ્યવિત્ ॥ ૧૫૪॥

ત્રિકોણચતુરશ્રસ્થા સર્વૈશ્વર્યાઽઽયુધાત્મિકા ।
કામેશ્વરીબાણરૂપા કામેશીચાપરૂપિણી ॥ ૧૫૫॥

કામેશીપાશરૂપા ચ કામેશ્યઙ્કુશરૂપિણી ।
કામેશ્વરીન્દ્રશક્તિશ્ચ અગ્નિચક્રકૃતાલયા ॥ ૧૫૬॥

કામગિર્યધિદેવી ચ ત્રિકોણસ્થાઽગ્રકોણગા ।
દક્ષકોણેશ્વરી વિષ્ણુશક્તિર્જાલન્ધરાશ્રયા ॥ ૧૫૭॥

સૂર્યચક્રાલયા રુદ્રશક્તિર્વામાઙ્ગકોણગા ।
સોમચક્રા બ્રહ્મશક્તિઃ પૂર્ણગિર્યનુરાગિણી ॥ ૧૫૮॥

શ્રીમત્ત્રિકોણભુવના ત્રિપુરાત્મા મહેશ્વરી ।
સર્વાનન્દમયેશી ચ બિન્દુગાતિરહસ્યભૃત્ ॥ ૧૫૯॥

પરબ્રહ્મસ્વરૂપા ચ મહાત્રિપુરસુન્દરી ।
સર્વચક્રાન્તરસ્થા ચ સમસ્તચક્રનાયિકા ॥ ૧૬૦॥

સર્વચક્રેશ્વરી સર્વમન્ત્રાણામીશ્વરી તથા ।
સર્વવિદ્યેશ્વરી ચૈવ સર્વવાગીશ્વરી તથા ॥ ૧૬૧॥

સર્વયોગીશ્વરી ચૈવ પીઠેશ્વર્યખિલેશ્વરી ।
સર્વકામેશ્વરી સર્વતત્ત્વેશ્વર્યાગમેશ્વરી ॥ ૧૬૨॥

શક્તિઃ શક્તિધૃગુલ્લાસા નિર્દ્વન્દ્વા દ્વૈતગર્ભિણી ।
નિષ્પ્રપઞ્ચા મહામાયા સપ્રપઞ્ચા સુવાસિની ॥ ૧૬૩॥

સર્વવિશ્વોત્પત્તિધાત્રી પરમાનન્દસુન્દરી (૧૦૦૦) ।
ઇત્યેતત્કથિતં દિવ્યં પરમાનન્દકારણમ્ ॥ ૧૬૪॥

લાવણ્યસિન્ધુલહરીબાલાયાસ્તોષમન્દિરમ્ ।
સહસ્રનામ તન્ત્રાણાં સારમાકૃષ્ય પાર્વતિ ॥ ૧૬૫॥

અનેન સ્તુવતો નિત્યમર્ધરાત્રે નિશામુખે ।
પ્રાતઃ કાલે ચ પૂજાયાં સર્વકાલમતઃ પ્રિયે ॥ ૧૬૬॥

સર્વસામ્રાજ્યસુખદા બાલા ચ પરિતુષ્યતિ ।
રત્નાનિ વિવિધાન્યસ્ય વિત્તાનિ પ્રચુરાણિ ચ ॥ ૧૬૭॥

મનોરથપથસ્થાનિ દદાતિ પરમેશ્વરી ।
પુત્રાઃ પૌત્રાશ્ચ વર્ધન્તે સન્તતિઃ સાર્વકાલિકી ॥ ૧૬૮॥

શત્રવસ્તસ્ય નશ્યન્તિ વર્ધન્તેઽસ્ય બલાનિ ચ ।
વ્યાધયસ્તસ્ય દૂરસ્થાઃ સકલાન્યૌષધાનિ ચ ॥ ૧૬૯॥

મન્દિરાણિ વિચિત્રાણિ રાજન્તે તસ્ય સર્વદા ।
કૃષિઃ ફલવતી તસ્ય ભૂમિઃ કામદુઘાઽવ્યયા ॥ ૧૭૦॥

સ્ફીતો જનપદસ્તસ્ય રાજ્યં તસ્ય નિરીતિકમ્ ।
માતઙ્ગાઃ પક્ષિણસ્તુઙ્ગાઃ સિઞ્ચન્તો મદવારિભિઃ ॥ ૧૭૧॥

દ્વારે તસ્ય વિરાજન્તે હૃષ્ટા નાગતુરઙ્ગમાઃ ।
પ્રજાસ્તસ્ય વિરાજન્તે નિર્વિવાદાશ્ચ મન્ત્રિણઃ ॥ ૧૭૨॥

જ્ઞાતયસ્તસ્ય તુષ્યન્તિ શીલં તસ્યાતિસુન્દરમ્ ।
લક્ષ્મીસ્તસ્ય વશે નિત્યં સ્વાસના ચ મનોરમા ॥ ૧૭૩॥

ગદ્યપદ્યમયી વાણી તસ્ય ગઙ્ગાતરઙ્ગવત્ ।
નાનાપદપદાર્થાનાં વાદચાતુર્યસમ્ભૃતા ॥ ૧૭૪॥

સમગ્રરસસમ્પત્તિશાલિની લાસ્યમાલિની ।
અદૃષ્ટાન્યપિ શાસ્ત્રાણી પ્રકાશ્યન્તે નિરન્તરમ્ ॥ ૧૭૫॥

નિગ્રહઃ પરવાક્યાનાં સભાયાં તસ્ય જાયતે ।
સ્તુવન્તિ વન્દિનસ્તં વૈ રાજાનો દાસવત્તથા ॥ ૧૭૬॥

શસ્ત્રાણ્યસ્ત્રાણિ તદઙ્ગે જનયન્તિ રુજાં ન હિ ।
મહિલાસ્તસ્ય વશગાઃ સર્વાવસ્થા ભવન્તિ વૈ ॥ ૧૭૭॥

વિષં નિર્વિષતાં યાતિ પાનીયમમૃતં ભવેત્ ।
પરપક્ષસ્તમ્ભનં ચ પ્રતિપક્ષસ્ય જૃમ્ભણમ્ ॥ ૧૭૮॥

નવરાત્રેણ જાયેત સ તદભ્યાસયોગવિત્ ।
અહોરાત્રં પઠેદ્યસ્તુ નિસ્તન્દ્રઃ શાન્તમાનસઃ ॥ ૧૭૯॥

વશે તસ્ય પ્રજા યાતિ સર્વે લોકાઃ સુનિશ્ચિતમ્ ।
ષણ્માસાભ્યાસયોગેન યોગમાયાતિ નિશ્ચિતમ્ ॥ ૧૮૦॥

નિત્યં કામકલાં ધ્યાયન્ યઃ પઠેત્ સ્તોત્રમુત્તમમ્ ।
મદનોન્માદકલિતાઃ પુરન્ધ્યાસ્તદ્વશાનુગાઃ ॥ ૧૮૧॥

લાવણ્યમદનાઃ સાક્ષાદ્વૈદગ્ધ્યમુદિતેક્ષણાઃ ।
પ્રેમપૂર્ણામપિ વશે હ્યુર્વશીં સ હિ વિન્દતિ ॥ ૧૮૨॥

ભૂર્જપત્રે રોચનયા કુઙ્કુમેન શુભે દિને ।
લાક્ષારસદ્રવેણાપિ યાવકૈર્વા વિશેષતઃ ॥ ૧૮૩॥

ધાતુરાગેણ વા દેવિ લિખિતં યન્ત્રમઞ્ચિતમ્ ।
સુવર્ણરૌપ્યગર્ભસ્થં સુસમ્પૂતં સુસાધિતમ્ ॥ ૧૮૪॥

બાલાબુદ્ધ્યા પૂજિતં ચ પ્રતિષ્ઠિતસમીરણમ્ ।
ધારયેન્મસ્તકે કણ્ઠે બાહુમૂલે તથા હૃદિ ॥ ૧૮૫॥

નાભૌ વાપિ ધૃતં ધન્યં જયદં સર્વકામદમ્ ।
રક્ષણં નાપરં કિઞ્ચિદ્વિદ્યતે ભુવનત્રયે ॥ ૧૮૬॥

ગ્રહરોગાદિભયહૃત્ સુખકૃત્યવિવર્ધનમ્ ।
બલવીર્યકરં ક્રૂરભૂતશત્રુવિનાશનમ્ ॥ ૧૮૭॥

પુત્રપૌત્રાન્ ગુણગણૈર્વર્ધનં ધનધાન્યકૃત્ ।

ધરણ્યાં સા પુરી ધન્યા યત્રાયં સાધકોત્તમઃ ॥ ૧૮૮॥

યદ્ગૃહે લિખિતં તિષ્ઠેત્ સ્તોત્રમેતદ્વરાનને ।
તત્ર ચાહં શિવે નિત્યં હરિશ્ચ કમલા તથા ॥ ૧૮૯॥

વસામઃ સર્વતીર્થાનામુત્પત્તિસ્તત્ર જાયતે ।
યો વાપિ પાઠયેદ્ભક્ત્યા પઠેદ્વૈ સાધકોત્તમઃ ॥ ૧૯૦॥

જ્ઞાનાનન્દકલાયોગાદૈક્યવૃત્તિં સ વિન્દતિ ।
સ્તોત્રેણાનેન દેવેશિ તવ પૂજાફલં લભેત્ ॥ ૧૯૧॥

ષોઢાન્યાસતનુર્ભૂત્વા પઠિતવ્યં પ્રયત્નતઃ ।
ઉત્તમા સર્વતન્ત્રાણાં બાલાયાઃ પૂજનસ્તુતિઃ ॥ ૧૯૨॥

તત્રોત્તમા ષોડશાર્ણા તત્રેદં સ્તોત્રમુત્તમમ્ ।
નાશિષ્યાય પ્રદાતવ્યમશુદ્ધાય શઠાય ચ ॥ ૧૯૩॥

અલસાયાપ્રયત્નાયાશિવાભક્તાય સુન્દરિ ।
ભક્તિહીનાય મલિને ગુરુનિન્દાપરાય ચ ॥ ૧૯૪॥

વિષ્ણુભક્તિવિહીનાય વિકલ્પાવૃતબુદ્ધયે ।
દેયં ભક્તવરે મુક્તેઃ કારણં ભક્તિવર્ધનમ્ ॥ ૧૯૫॥

લતાયોગે પઠેદ્યસ્તુ સ્તોત્રમેતદ્વરાનને ।
સૈવ કલ્પલતા તસ્ય વાઞ્છાફલકરી તથા ॥ ૧૯૬॥

પુષ્પિતાયા લતાયોગે કુરઙ્ગમુખિ સાધકઃ ।
અક્ષુબ્ધઃ સન્ પઠેદ્યસ્તુ શતયજ્ઞસ્ય પુણ્યભાક્ ॥ ૧૯૭॥

બ્રહ્માદયોઽપિ દેવેશિ પ્રાર્થયન્તિ પદદ્વયમ્ ।
સ્વયં શિવઃ સ વિજ્ઞેયો યો બાલાભાવલમ્પટઃ ॥ ૧૯૮॥

બ્રહ્માનન્દમયી જ્યોત્સ્ના સદાશિવવિધૂદિતા ।
આનન્દો યોઽપિ યં વેદા વદન્ત્યસ્યા વશે સ્થિતાઃ ॥ ૧૯૯॥

આહ્લાદનં બાલાધ્યાનાદ્બાલાયા નામકીર્તનાત્ ।
સદાનન્દાભ્યાસયોગાત્ સદાનન્દઃ પ્રજાયતે ॥ ૨૦૦॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ભૈરવભૈરવીસંવાદે
શ્રીબાલાત્રિપુરસુન્દરીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by DPD with help from Alex

Proofread by DPD, PSA Easwaran psaeaswaran at gmail.com

*Shri Balatripurasundari Sahasranamastotram 2*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*